दुर्गा सप्तशती — अध्याय 11

Durga Saptashati — Chapter 11

Source: Selected 1894 ancient core — chapter 11. Also compared: Opening — physical scan 247; Ending and colophon — physical scan 271; Verified 1894 imprint — physical scan 7; Ancient Sanskrit comparison only.

प्रारम्भ — वक्ता

SPEAKER

ऋषिरुवाच।

ṛṣiruvāca|

अध्याय 11 — नारायणी स्तुति

TEXT POSITION 1

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम्।
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्रास्तु विकाशिताशाः॥

devyā hate tatra mahāsurendre sendrāḥ surā vahnipurogamāstām|
kātyāyanīṃ tuṣṭuvuriṣṭalābhādvikāśivakrāstu vikāśitāśāḥ||

Note: The selected विकाशिवक्रास्तु is unusual but its face-and-hope image is retained. The comparison has different facial-lotus wording.

TEXT POSITION 2

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य॥

devi prapannārtihare prasīda prasīda mātarjagato'khilasya|
prasīda viśveśvari pāhi viśvaṃ tvamīśvarī devi carācarasya||

TEXT POSITION 3

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये॥

ādhārabhūtā jagatastvamekā mahīsvarūpeṇa yataḥ sthitāsi|
apāṃ svarūpasthitayā tvayaitadāpyāyate kṛtsnamalaṅghyavīrye||

TEXT POSITION 4

त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया।
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥

tvaṃ vaiṣṇavī śaktiranantavīryā viśvasya bījaṃ paramāsi māyā|
saṃmohitaṃ devi samastametattvaṃ vai prasannā bhuvi muktihetuḥ||

TEXT POSITION 5

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितमम्बयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः॥

vidyāḥ samastāstava devi bhedāḥ striyaḥ samastāḥ sakalā jagatsu|
tvayaikayā pūritamambayaitatkā te stutiḥ stavyaparāparoktiḥ||

TEXT POSITION 6

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः॥

sarvabhūtā yadā devī svargamuktipradāyinī|
tvaṃ stutā stutaye kā vā bhavantu paramoktayaḥ||

Note: The selected and comparison main texts read सर्वभूता; a different form occurs only in apparatus.

TEXT POSITION 7

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते॥

sarvasya buddhirūpeṇa janasya hṛdi saṃsthite|
svargāpavargade devi nārāyaṇi namo'stu te||

TEXT POSITION 8

कलाकाष्ठादिरूपेण परिणामप्रदायिनि।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते॥

kalākāṣṭhādirūpeṇa pariṇāmapradāyini|
viśvasyoparatau śakte nārāyaṇi namo'stu te||

TEXT POSITION 9

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥

sarvamaṅgalamāṅgalye śive sarvārthasādhike|
śaraṇye tryambake gauri nārāyaṇi namo'stu te||

TEXT POSITION 10

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते॥

sṛṣṭisthitivināśānāṃ śaktibhūte sanātani|
guṇāśraye guṇamaye nārāyaṇi namo'stu te||

TEXT POSITION 11

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥

śaraṇāgatadīnārtaparitrāṇaparāyaṇe|
sarvasyārtihare devi nārāyaṇi namo'stu te||

TEXT POSITION 12

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते॥

haṃsayuktavimānasthe brahmāṇīrūpadhāriṇi|
kauśāmbhaḥkṣarike devi nārāyaṇi namo'stu te||

TEXT POSITION 13

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते॥

triśūlacandrāhidhare mahāvṛṣabhavāhini|
māheśvarīsvarūpeṇa nārāyaṇi namo'stu te||

TEXT POSITION 14

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते॥

mayūrakukkuṭavṛte mahāśaktidhare'naghe|
kaumārīrūpasaṃsthāne nārāyaṇi namo'stu te||

TEXT POSITION 15

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते॥

śaṅkhacakragadāśārṅgagṛhītaparamāyudhe|
prasīda vaiṣṇavīrūpe nārāyaṇi namo'stu te||

TEXT POSITION 16

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते॥

gṛhītogramahācakre daṃṣṭroddhṛtavasundhare|
varāharūpiṇi śive nārāyaṇi namo'stu te||

TEXT POSITION 17

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते॥

nṛsiṃharūpeṇogreṇa hantuṃ daityānkṛtodyame|
trailokyatrāṇasahite nārāyaṇi namo'stu te||

TEXT POSITION 18

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते॥

kirīṭini mahāvajre sahasranayanojjvale|
vṛtraprāṇahare caindri nārāyaṇi namo'stu te||

TEXT POSITION 19

शिवदूतीस्वरूपेण हतदैत्यमहाबले।
घोररूपे महारावे नारायणि नमोऽस्तु ते॥

śivadūtīsvarūpeṇa hatadaityamahābale|
ghorarūpe mahārāve nārāyaṇi namo'stu te||

TEXT POSITION 20

दंष्ट्राकरालवदने शिरोमालाविभूषणे।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते॥

daṃṣṭrākarālavadane śiromālāvibhūṣaṇe|
cāmuṇḍe muṇḍamathane nārāyaṇi namo'stu te||

TEXT POSITION 21

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टे स्वधे ध्रुवे।
महारात्रि महामाये नारायणि नमोऽस्तु ते॥

lakṣmi lajje mahāvidye śraddhe puṣṭe svadhe dhruve|
mahārātri mahāmāye nārāyaṇi namo'stu te||

TEXT POSITION 22

मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते॥

medhe sarasvati vare bhūti bābhravi tāmasi|
niyate tvaṃ prasīdeśe nārāyaṇi namo'stu te||

TEXT POSITION 23

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥

sarvasvarūpe sarveśe sarvaśaktisamanvite|
bhayebhyastrāhi no devi durge devi namo'stu te||

TEXT POSITION 24

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्वभीतेभ्यः कात्यायनि नमोऽस्तु ते॥

etatte vadanaṃ saumyaṃ locanatrayabhūṣitam|
pātu naḥ sarvabhītebhyaḥ kātyāyani namo'stu te||

TEXT POSITION 25

ज्वालाकरालमत्युग्रमशेषासुरसूदनम्।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥

jvālākarālamatyugramaśeṣāsurasūdanam|
triśūlaṃ pātu no bhīterbhadrakāli namo'stu te||

TEXT POSITION 26

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव॥

hinasti daityatejāṃsi svanenāpūrya yā jagat|
sā ghaṇṭā pātu no devi pāpebhyo naḥ sutāniva||

TEXT POSITION 27

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्॥

asurāsṛgvasāpaṅkacarcitaste karojjvalaḥ|
śubhāya khaḍgo bhavatu caṇḍike tvāṃ natā vayam||

TEXT POSITION 28

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान्।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति॥

rogānaśeṣānapahaṃsi tuṣṭā ruṣṭā tu kāmānsakalānabhīṣṭān|
tvāmāśritānāṃ na vipannarāṇāṃ tvāmāśritā hyāśrayatāṃ prayānti||

Note: The hymn's illness and refuge language is devotional assurance, not treatment advice or blame for illness.

TEXT POSITION 29

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम्।
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्करोति कान्या॥

etatkṛtaṃ yatkadanaṃ tvayādya dharmadviṣāṃ devi mahāsurāṇām|
rūpairanekairbahudhātmamūrtiṃ kṛtvāmbike tatkaroti kānyā||

TEXT POSITION 30

विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या।
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम्॥

vidyāsu śāstreṣu vivekadīpeṣvādyeṣu vākyeṣu ca kā tvadanyā|
mamatvagarte'timahāndhakāre vibhrāmayatyetadatīva viśvam||

TEXT POSITION 31

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र।
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम्॥

rakṣāṃsi yatrograviṣāśca nāgā yatrārayo dasyubalāni yatra|
dāvānalo yatra tathābdhimadhye tatra sthitā tvaṃ paripāsi viśvam||

Note: Protection amid serpents, fire, enemies and the sea is hymnic praise, not a guarantee of physical immunity.

TEXT POSITION 32

विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः॥

viśveśvarī tvaṃ paripāsi viśvaṃ viśvātmikā dhārayasīti viśvam|
viśveśavandyā bhavatī bhavanti viśvāśrayā ye tvayi bhaktinamrāḥ||

TEXT POSITION 33

देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान्॥

devi prasīda paripālaya no'ribhīternityaṃ yathāsuravadhādadhunaiva sadyaḥ|
pāpāni sarvajagatāṃ praśamaṃ nayāśu utpātapākajanitāṃśca mahopasargān||

TEXT POSITION 34

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥

praṇatānāṃ prasīda tvaṃ devi viśvārtihāriṇi|
trailokyavāsināmīḍye lokānāṃ varadā bhava||

TEXT POSITION 35

देव्युवाच।
वरदाहं सुरगणा वरं यन्मनसेच्छथ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम्॥

devyuvāca|
varadāhaṃ suragaṇā varaṃ yanmanasecchatha|
taṃ vṛṇudhvaṃ prayacchāmi jagatāmupakārakam||

TEXT POSITION 36

देवा ऊचुः।
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्॥

devā ūcuḥ|
sarvābādhāpraśamanaṃ trailokyasyākhileśvari|
evameva tvayā kāryamasmadvairivināśanam||

TEXT POSITION 37

देव्युवाच।
वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतितमे युगे।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥

devyuvāca|
vaivasvate'ntare prāpte aṣṭāviṃśatitame yuge|
śumbho niśumbhaścaivānyāvutpatsyete mahāsurau||

TEXT POSITION 38

नन्दगोपगृहे जाता यशोदागर्भसंभवा।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥

nandagopagṛhe jātā yaśodāgarbhasaṃbhavā|
tatastau nāśayiṣyāmi vindhyācalanivāsinī||

TEXT POSITION 39

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले।
अवतीर्य हनिष्यामि वैप्रचितांश्च दानवान्॥

punarapyatiraudreṇa rūpeṇa pṛthivītale|
avatīrya haniṣyāmi vaipracitāṃśca dānavān||

TEXT POSITION 40

भक्षयन्त्याश्च तानुग्रान्वैप्रचितान्महासुरान्।
रक्ता दन्ता भविष्यन्ति दाडिमी कुसुमोपमाः॥

bhakṣayantyāśca tānugrānvaipracitānmahāsurān|
raktā dantā bhaviṣyanti dāḍimī kusumopamāḥ||

TEXT POSITION 41

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥

tato māṃ devatāḥ svarge martyaloke ca mānavāḥ|
stuvanto vyāhariṣyanti satataṃ raktadantikām||

TEXT POSITION 42

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि।
मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा॥

bhūyaśca śatavārṣikyāmanāvṛṣṭyāmanambhasi|
munibhiḥ saṃstutā bhūmau saṃbhaviṣyāmyayonijā||

TEXT POSITION 43

ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः॥

tataḥ śatena netrāṇāṃ nirīkṣiṣyāmi yanmunīn|
kīrtayiṣyanti manujāḥ śatākṣīmiti māṃ tataḥ||

TEXT POSITION 44

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः॥

tato'hamakhilaṃ lokamātmadehasamudbhavaiḥ|
bhariṣyāmi surāḥ śākairāvṛṣṭeḥ prāṇadhārakaiḥ||

Note: The future drought and nourishing vegetation belong to the goddess's mythic account, not weather prediction or food-safety advice.

TEXT POSITION 45

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥

śākambharīti vikhyātiṃ tadā yāsyāmyahaṃ bhuvi|
tatraiva ca vadhiṣyāmi durgamākhyaṃ mahāsuram||

TEXT POSITION 46

दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले॥

durgādevīti vikhyātaṃ tanme nāma bhaviṣyati|
punaścāhaṃ yadā bhīmaṃ rūpaṃ kṛtvā himācale||

TEXT POSITION 47

रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः॥

rakṣāṃsi bhakṣayiṣyāmi munīnāṃ trāṇakāraṇāt|
tadā māṃ munayaḥ sarve stoṣyantyānamramūrtayaḥ||

TEXT POSITION 48

भीमादेवीति विख्यातं तन्मे नाम भविष्यति।
यदारुणाख्यस्त्रैलोक्ये महावाधां करिष्यति॥

bhīmādevīti vikhyātaṃ tanme nāma bhaviṣyati|
yadāruṇākhyastrailokye mahāvādhāṃ kariṣyati||

TEXT POSITION 49

तदाहं भ्रामरं रूपं कृत्वा संख्येयषट्पदम्।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्॥

tadāhaṃ bhrāmaraṃ rūpaṃ kṛtvā saṃkhyeyaṣaṭpadam|
trailokyasya hitārthāya vadhiṣyāmi mahāsuram||

Note: The selected main text has संख्येय, "countable"; the comparison has असंख्येय, "innumerable." The selected reading is not silently reversed.

TEXT POSITION 50

भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः।
इत्थं यदा यदा वाधा दानवोत्था भविष्यति॥

bhrāmarīti ca māṃ lokāstadā stoṣyanti sarvataḥ|
itthaṃ yadā yadā vādhā dānavotthā bhaviṣyati||

HALF-VERSE 51

तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम्॥

tadā tadāvatīryāhaṃ kariṣyāmyarisaṃkṣayam||

समापन — पुष्पिका

COLOPHON

इति श्रीमार्कण्डेयपुराणे देवैः कृता नारायणीस्तुतिनामैकादशोऽध्यायः॥११॥

iti śrīmārkaṇḍeyapurāṇe devaiḥ kṛtā nārāyaṇīstutināmaikādaśo'dhyāyaḥ||11||